# संस्कृत-वार्ताः

**दिनाङ्कः-11.05.2024** **सायम् - 06:20**

**मुख्यवार्ताः**

- लोकसभा-निर्वाचनस्य चतुर्थ-चरणात्मकीय-प्रचारः अद्य सायं समाप्तिं प्रति यास्यति। चतुर्थ-चरणेऽस्मिन् नव-राज्यानां, केन्द्रशासित-प्रदेशस्य षण्णवति-आसनेषु त्रयोदश-दिनांके मई मासे मतदानं भविष्यति।
- विदेशमन्त्री डॉ. एस.जयशंकर अवोचत् यत् अभिव्यक्तेः स्वतन्त्रतायाः अर्थः पृथक्तावादस्य समर्थनस्य स्वतन्त्रता नास्ति।
- सिंगापुरस्य प्रधानमन्त्रिणा ली सिएन इत्यनेन देशस्य प्रगतौ वैदेशिक प्रतिभानां योगदानस्य प्रशंसा कृतास्ति।
- ह्यः रात्रौ असाधारण-शक्तिशाली-सौर-धूलियुत-झञ्झावात-कारणात् ऑस्ट्रेलिया-तः ब्रिटेन-देशं यावत् आकाशीय-विद्युत् दृग्गोचरी जाता।
- मिस्र-देशे विश्व-स्क्वैश-चैम्पियनशिप-प्रतिस्पर्धायां भारतीय-क्रीडकेन रमित-टंडनेन विजय-पुरस्सरं प्रारम्भः विहितः।

## लोकसभा निर्वाचनं

लोकसभा-निर्वाचनस्य चतुर्थ-चरणात्मकीय-प्रचारः अद्य सायं समाप्तिं प्रति यास्यति। चतुर्थ-चरणेऽस्मिन् नव-राज्यानां, केन्द्रशासित-प्रदेशस्य षण्णवति-आसनेषु त्रयोदश-दिनांके मई मासे मतदानं भविष्यति। चरणेऽस्मिन् आन्ध्रप्रदेशस्य पञ्चविंशतिः, बिहारराज्यस्य पञ्च, झारखण्डस्य चत्वारः, मध्यप्रदेशस्य अष्ट, महाराष्ट्रस्य एकादश, ओडिसायाः चत्वारः, तेलंगानायाः सप्तदश, उत्तरप्रदेशस्य त्रयोदश, पश्चिमबंगालस्य अष्ट, जम्मू-कश्मीरस्य आसनमेकं समाविष्टः। विभिन्न-राजनीतिक-दलानां शीर्ष-नेतारः जनसभाः कुर्वन्ति। मध्यप्रदेशे चरणेऽस्मिन् देवास-उज्जैन, मंदसौर, रतलाम-धार-इंदौर-खारगोन-खंडवा-निर्वाचन-क्षेत्रेषु मतदानं भवितम्। प्रधानमन्त्री-भा ारतीय-जनता-पार्टीति दलस्य वरिष्ठ-नेता-नरेन्द्र-मोदी च ओडिसायाः बोलांगीर-क्षेत्रेऽद्य एकस्यां जनसभायां राज्यस्य मुख्यमन्त्री नवीन-पटनायकस्य कटुवालोचना कृता।

## जयशंकरः कनाडा

विदेशमन्त्री डॉ. एस.जयशंकर अवोचत् यत् अभिव्यक्तेः स्वतन्त्रतायाः अर्थः पृथक्तावादस्य समर्थनस्य स्वतन्त्रता नास्ति। कनाडादेशे पृथक्तावाद-सम्बद्धः घटनाः प्रति संकेतं विधाय तेनोक्तं यत् पृथक्तावादस्य हिंसानां च निर्बाध-समर्थनं कर्तृभ्यः चरमपंथिभ्यः कनाडादेशस्य राजनीतौ संरक्षणं विद्यते। अपि च विदेशमन्त्री अवोचत् यत् प्रत्येकं राष्ट्रं प्रतिवेशिभिः देशैः सह उचित-सम्बन्धान् इच्छति। परं सम्प्रति चीनेन सह भारतस्य सम्बन्धाः सामान्याः न सन्ति। यतोहि सीमायां शान्तौ बाधा समुत्पन्ना। विषयेऽस्मिन् भारतं चीनेन सह अनवरतं संवादं विदधाति। अपि च उक्तं यत् भारतम् अस्मिन् विषये समाधानाय परिचर्चां कुर्वन् अस्ति।

## सिंगापुर-प्रधानमन्त्री

सिंगापुरस्य प्रधानमन्त्रिणा ली सिएन इत्यनेन देशस्य प्रगतौ वैदेशिक प्रतिभानां योगदानस्य प्रशंसा कृतास्ति। सिंगापुरस्य वार्ताभिकरणे सह संवादे तेनोक्तं यत् भारतीय-प्रौद्योगिक-संस्थानस्य भारतीयप्रबन्धन-संस्थानस्य स्नातकाः बृहत्सङ्ख्यायां सिंगापुरे कार्यमाचरन्ति। अपि चोक्तं यत् भाविन्याम् अपि तेषां सेवाः यथावत् प्रवर्तयिष्यन्ते अवधेयं यत् ली सिएन लूंग इत्यस्य कार्यकालः अस्य मासस्य पञ्चदश दिनांके पूर्णं भविष्यति।

## सौर-धूलिझञ्झावात-पृथ्वी

ह्यः रात्रौ असाधारण-शक्तिशाली-सौर-धूलियुत-झञ्झावात-कारणात् ऑस्ट्रेलिया-तः ब्रिटेन-देशं यावत् आकाशीय-विद्युत् दृग्गोचरी जाता। एषः झञ्झावातः त्र्यधिक-द्विसहस्र-तमीय वर्षे समायात-हैलोविन-इति नामधेय-झञ्झावातात् अनन्तरं साम्प्रत यावत् सर्वाधिक-शक्तिशाली-झञ्झावातो अनुमितः। एषा भयावही-स्थितिः तदा उत्पद्यते यदा सूर्यस्य बाह्यावरणस्य-गुरूत्वाकर्षण-क्षेत्र-प्लाज्मा च बृहमात्रिक-स्रावितो जातः। एतस्मात् कारणात् बहुषु स्थलेषु अन्तर्जाल-उपग्रह-विद्युत्-गृहाणां कार्यजातं दुष्प्रभावितं जातम्। अमेरिकीय-ऋतुविज्ञान-विभागानुसारेण, आगामिषु समयेषु एतादृश्याः परिस्थितयः उत्पद्यन्ते एव।

## संयुक्तराष्ट्रं फिलिस्तीन

भारतेन संयुक्तराष्ट्रसभायां फिलिस्तीन-राष्ट्रस्य पूर्णसदस्यत्वेन चयनस्य पक्षे मतदानं कृतम्। गतदिने संयुक्त अरब अमीरातेन उपस्थापिते प्रस्तावे त्रिचत्वारिंशत् उत्तरैकशतं देशैः मतदानं कृतम्।

## शोपियां निगडनम्

कश्मीर उपत्यकायाम् आरक्षिभि: शोपियां जनपदे द्वौ आतङ्किनौ निगडितौ। आधिकारिक स्रोतोभि: सूचितं यत् आरक्षिभि: सैन्यबलै: सह कृते अन्वीक्षणे एतौ  निगडितौ। उभौ अपि आतङ्किनौ शोपियां जनपदस्य बाबा मोहल्लाक्षेत्रस्य निवासिनौ स्त:। उभौ विरुध्य हरिपोरा आरक्षिस्थात्रे प्राथमिकी पञ्जीकृत्य अन्वीक्षणम् आरब्धम्।

## प्रियंका

कांग्रेस-महासचिव-प्रियंका-गांधिना-तदीय-दलस्य प्रशासनै: देशे जनजातीय-समुदायानां रक्षार्थं अनुसूचितजाति-अनुसूचितजनजाति, अत्याचापर-निवारण-अधिनियम-पेसा-अधिनियम-पञ्चायती-राज-अधिनियम-वनाधिकार-अधिनियम-मनरेगा-सदृश-योजना: प्रभाविकृता:। अद्य उत्तरी-महाराष्ट्रस्य-जनजातीय-बहुल-नंदुरबार-जनपदे-एकस्यां जनसभायां तया मणिपुर-हिंसायां एनडीए प्रशासनस्य विचारधारायां आलोचना कृता। प्रियंका-गान्धिना भणितं यत् नरेन्द्रमोदी प्रशासनं हाथरस-सदृश-घटनानां-पदक-विजेत्री महिला-मल्ल-क्रीडकाणां अभ्याचना कृता।

## अफगानिस्तान-जलपूर

संयुक्तराष्ट्रसंघेन प्रोक्तं यत् अफगानिस्ताने जलपूर-कारणात् मृतकानां संख्या द्विशताधिका-सञ्जातास्ति। केवल उत्तरी-प्रान्त-बग़लाने एव द्वि-षष्टि: अधिका: जना: मृता:। सहस्राधिक: आवास-भवनानि क्षतिग्रस्तानि जातानि। बग़लाने भीषण-वृष्टे: जलपूरस्य स्थिति: उत्पन्ना जायते। तत्र जनजीवनं दुष्प्रभावितं जातम्। जलपूरात् तिशकन-जनपदे मृतकानां संख्या-वधियते इत्यां शक्यते। मार्गीय-सम्पर्केऽपि छिन्नो जात:।

## स्क्वश-क्रीडा

मिस्र-देशे विश्व-स्क्वैश-चैम्पियनशिप-प्रतिस्पर्धायां भारतीय-क्रीडकेन रमित-टंडनेन विजय-पुरस्सरं प्रारम्भ: विहित:। विश्व-अंक-तालिकायां षड्त्रिंशत्-स्थानधारको क्रीडकोऽयं प्रथम-स्तरे अमेरिकाया: फराज़-खानं पराजित्य विजयं अधिगतम्। एष: एकमात्र विजयं अधिगतम्। एष: एकमात्र-क्रीडको वर्तते य: एतस्यां प्रतियोगितायां भागं ग्रहीष्यति। रमित: आगामि प्रतिस्पर्धायां विश्वस्य सप्तम-अंकीय-क्रीडकेन इंग्लैण्ड-देशीय-मोहम्मद-एल-शोरबागीं सम्मुखी करिष्यति।

## निशा-ओलम्पिक

निशा-दहिया पेरिस-ओलम्पिक-प्रतिस्पर्धाया: कृते चिता वर्तते। स्पर्धा विजेत्री एषा पञ्चमी महिला-मल्ल-योद्धा वर्तते। ह्य: तुर्किए-नगरस्य इस्तांबुल-स्थले सञ्जाते विश्व-ओलम्पिक-पागुपान्त्यचक्रे, निशा अष्ट-षष्टि:-किलो मित-भार-वर्गे उपान्त्यचक्रे, रोमानिया-देशीय एलेक्जेंड्रा-एंजेलं पराजितवती। एतत् वारप्रथमं भविष्यति यदा पञ्च-भारतीय-महिला: मल्लक्रीडायां ओलम्पिक-स्पर्धायां स्पर्धिष्यन्ति। इत: प्राक्-पंघाल-विनेश-फोगाट-अंशुमलिक-रीतिका-हुड्डा-स्पर्धायां समविष्टा: अवर्तन्त।

## आईपीएल क्रिकेट

आईपीएल क्रिकेट स्पर्धा मालिकायाम् अद्य मुम्बई इण्डियन्स-कोलकाता नाइट-राइडर्स दले क्रीडिष्यत:। कोलकाताया: इडनगार्डन क्रीडांगणे एषा स्पर्धा सायं सार्ध सप्त वादने आरप्स्यते। गतरात्रौ क्रीडितायां स्पर्धायां गुजरातदलेन चेन्नई दलं पञ्चविंशति: धावनाङ्कै: पराजितम्।

**।। इति वार्ता: ।।**